Gyanshauryam, International Scientific Refereed Research Journal
© 2019 GISRRJ | Volume 2 | Issue 6 | ISSN : 2582-0095

# ज्योतिषशास्त्रदृष्ट्या कर्कटरोग (Cancer Disease) विश्लेषणम्

प्रो. प्रभातकुमारमहापात्रः
आचार्यः, विभागाध्यक्षश्च, ज्योतिषविभागः, राष्ट्रियसंस्कृतसंस्थानम्, श्रीरणवीरपरिसरः, जम्मू


प्राय : सर्वे जानन्ति यत् कर्कटरोगेण मानवजीवनं अचिरमेव समाप्तिम् उपयाति । जन्मकुण्डलीं विश्लेषणेन ग्रहाणां स्थिति वशात् कर्कटरोग : कदा भवति तस्य सम्भावनाया निरूपणं कर्त्तुं शक्नुम :।

प्रथमत : य : ग्रह : सर्वाधिक : पापग्रहेण पीडितो भवति तस्य दशान्तर्दशायां कर्कटरोग : सम्भवति । द्वितीयत : षष्ठाष्टमद्वादशभावेशानां दशान्तर्दशायामपि एष : रोग : सम्भवति ।
तृतीयत : षष्ठाष्टमद्वादशभावस्थानां ग्रहाणां दशान्तर्दशायामपि एष : कर्कटरोग : सम्भवति।
चतुर्थत : राहुसूर्ययो : षष्ठाष्टमभावयोर्मध्ये यदि सम्बन्ध : जायते चेत् तदा कर्कटरोग : भवति।
एवं पञ्चमत : राहु : यदि मकरराशौ अथवा शनि : कुम्भराशौ तथा च क्षीण : शनि : पापग्रहेण पीडित : भवति चेत् तर्हि राहो : अथवा शने : दशान्तर्दशायामपि एष : रोग : सम्भवति : ।

उपर्युक्तानां विषयाणां विवेचनार्थं मया कर्कटरोगेण पीडितानां जनानां जन्मकुण्डलय : विश्लेष्यते ।
कुण्डली–१


एका स्तनकर्कटरोगेण पीडिता काचित् नारी, तस्या : जन्मकुण्डलीं प्रदर्शयामि -
अत्र षष्ठेश : शनि : अष्टमाधिप : गुरु : केतुना सह षष्ठभावे विद्यते । चतुर्थभावे सूर्यभौमौ राहुणा प्रभावितौ। कर्कटराशिस्थ : राहु : द्वादशभावे अस्ति । द्वादशाधिपति : चन्द्र : वाधकभावे वर्तते । कर्कटराशिं प्रति षष्ठेशस्य अष्टमेशस्य च पूर्णा दृष्टिरस्ति । चन्द्रस्य बाधकभावस्थ कारणात् द्वादशस्थस्य राहो : महादशायां लग्नेशस्य सूर्यस्य अन्तर्दशाकारणात् स्तनकर्कटरोग : अभूत् ।

Received: 01 Nov 2019 | Accepted: 29 Nov 2019 | November-December-2019 [ 2 (6) : 171-176 ]




कुण्डली–२


एषः जातकः रक्तकर्कटरोगेण पीडितः । लग्ने नीचस्थः शुक्रः, राहुः एवं चन्द्रेण सह विद्यते । षष्ठेशस्य शनेः पूर्णा दृष्टिः लग्नं प्रति वर्तते । तथा अष्टमेशः मङ्गलः, द्वादेशेशः सूर्यः तृतीयभावे स्तः । अत्र चन्द्रशुक्रयोः राहुणा सहः युक्ते शनिना दृष्टे सति कर्कटरोगः भवति । द्वादशेशः सूर्यः अस्तं भूत्वा लग्नेशेन सह अष्टमेशेन सह च तृतीयभावे वर्तेते । अतः जातकस्य राहुमहादशायां लग्नाधिपः वुधस्य अन्तर्दशायां रक्तकर्कटरोगस्य निर्णयः आसीत् ।




कुण्डली–३

जातकः रक्तकर्कटरोगेण पीडितः । राहुणा दृष्टः चन्द्रमा चतुर्थभावे अस्ति । राहुः अष्टमभावे वृषराशिस्थः अस्ति । षष्ठेशः गुरुः सप्तमस्थो भूत्वा शनिना दृष्टः । मङ्गलः द्वादशभावस्थः वर्तते ।


लग्नेश : शुक्र : राहुशनिभ्यां सह दृष्ट : । तृतीयेश : षष्ठेश : च गुरु : सप्तमे मारकस्थाने विद्यते । रोगस्य निरूपणं वृहस्पतिमहादशायाम् अन्तर्दशायाञ्च अभवत् । कारणं यत् गुरु : मारकस्थ : ।




कुण्डली–४

अत्रापि जातक : रक्तकर्कटेण पीडित : । षष्ठेश : षष्ठभावात् गणनायां षष्ठो भूत्वा एकादशस्थानस्य च अधिपति : मङ्गल : लग्नस्थ : भवति । लग्नेश : बुध : अष्टमेशेन शनिना सह शने : गृहे अस्ति । तृतीयेश : सूर्य : द्वादशेश : शुक्रेण सह वर्तते । राहो : पूर्णदृष्टि : सूर्यशुक्रयोरुपरि अस्ति । सूर्यमहादशायां शुक्रअन्तर्दशायां रक्तकर्कटरोगस्य निर्णय : यात : ।


कुंडली सं. 4




कुण्डली–५


एका जातिका थाइराइडकर्कटरोगेण पीडिता आसीत् । द्वितीयेश : एकादशेशश्च बुध : द्वितीयभावे विद्यते । वुधस्योपरि चन्द्रस्य शनेश्च दृष्टि : वर्तते । अत्र चन्द्र : द्वादशेश :, शनि : षष्ठेश : सप्तमेशश्च । रोगस्य निरूपणं मङ्गलदशायां राहुअन्तर्दशायां अभवत् । परन्तु लग्नेश : सूर्य : लग्नस्थ कारणात् स्वराशिस्थ : गुरुो : लग्नं प्रति पूर्णदृष्टि : कारणात् जातिकाया : रोग : शल्यक्रियामाध्यमेन निर्मूल : अभवत् ।

कुंडली सं. 5




कुण्डली–६

जातक : लीवरकर्कटरोगेण पीडित : आसीत् । जातकेऽस्मिन् लग्नेश : बुध : षष्ठभावे सूर्येण सह स्थित्वा अस्तं गत : । पञ्चमे नीचस्थ : गुरु : अस्ति । राहुणा दृष्ट : पञ्चमेश : षष्ठेश : शनि : सप्तमस्थ : वर्तते । राहो उपरि अष्टमस्थ : अष्टमेशस्य मङ्गलस्य दृष्टि : वर्तते। शुक्रोऽपि सूर्यकारणात् अस्तं भूत्वा षष्ठभावे वर्तते । लीवरकर्कटरोगस्य निरूपणं राहुमहादशायां शुक्रअन्तर्दशायाम् अभवत् ।




कुण्डली–७

जातिका अत्र मूत्रकृच्छ्कर्कटरोगेण पीडिता आसीत् । अस्या : पञ्चमभावे अष्टमेश : सूर्य :, षष्ठेश : बुध :, एवं च द्वादशेश : गुरु : वर्तते । पञ्चमस्थ : पञ्चमेश : शुक्रस्योपरि षष्ठेश : बुधस्य, अष्टमेश : सूर्यस्य, द्वादशेश : गुरो : पूर्णप्रभाव : अस्ति । अत्र मङ्गल : बाधकेश : एवं शनि : द्वादशभावस्थ : । अत : शने : महादशायां मङ्गलअन्तर्दशायां मूत्रकृच्छ्कर्कटरोगस्य निर्णय : अभूत् ।




अत्र यथाशक्ति : यथा मति : मया विषयोपस्थापनं कृतम् । विभिन्नानां कर्कटरोगाणां निरूपणं कृत्वा यथाप्रयासेन यथाशीघ्रं चिकित्सां करणीयमिति धिया मन्ये पाठकानां उपकाराय भविष्यति । इति सम् ।।

सन्दर्भ: ग्रन्थसूची–


1. सारावली – कल्याणवर्मा – मोतीलाल–बनारसी––दास:, दिल्ली
2. बृहत्पाराशर–होराशास्त्रम् – पराशर: – चौखम्भासंस्कृतभवनम्–वाराणसी
3. ज्योतिषरत्नाकर: – देवकीनन्दनसिंह: – मोतीलाल–बनारसीदास:, दिल्ली
4. फलदिपीका – मन्त्रेश्वर: – व्याख्याकार: – पण्डित: गोपेशकुमारओझा – मोतिलालबनारसीदास: – दिल्ली
5. प्रश्न–मार्ग: (प्रथमखण्ड:) – संपादक: – शुकदेवचतुर्वेदी –रंजनपब्लिकेशन्स–नईदिल्ली
6. ज्योतिषऔररोग – ज्योतिर्विदजगन्नाथभसीन – प्रकाशक: – गोयल एण्ड कम्पानी दरीवा, दिल्ली–[३क]
7. रोगज्योतिषउपचारसहित – आचार्यविवेकश्रीकौशिक
8. MedicalAstrology–Dr.S.KrishnaKumar, BharatiyaPrachyaEvamSanatanaVigyanSansthan, Delhij
9. जातकपारिजात: – श्रीदैवज्ञवैद्यनाथ: – चौखम्भासंस्कृतसंथानम्, वाराणसी